# shrIshivavarNamAlA stotram

# श्रीशिववर्णमाला अथवा परमशिवाक्षरमालिकास्तोत्रम्

## Document Information

Text title : shivavarNamAlA

File name : shivavarNamAlA.itx

Category : shiva

Location : doc_shiva

Latest update : February 18, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# श्रीशिववर्णमाला अथवा परमशिवाक्षरमालिकास्तोत्रम्

हर साम्बसदाशिव साम्बसदाशिव साम्बसदाशिव साम्बशिव ॥ ध्रुवपद।

अद्भुतविग्रह अमराधीश्वर अगणितगुणगण अमृतशिव ।
साम्बसदाशिव साम्बसदाशिव साम्बसदाशिव साम्बशिव ॥ १
आनन्दामृत आश्रितरक्षक आत्मानन्द महेश शिव ।
इन्दुकलाधर इन्द्रादिप्रिय सुन्दररूप सुरेश शिव ।
ईश सुरेश महेश जनप्रिय केशवसेवितपाद शिव ।
उरगादिप्रियभूषण शङ्कर नरकविनाश नटेश शिव ।
ऊर्जितदानवनाश परात्पर आर्जितपापविनाश शिव ।
ऋग्वेदश्रुतिमौलिविभूषणरविचन्द्राग्नि त्रिनेत्र शिव ।
ॠप मनादि प्रपञ्च विलक्षण तापनिवारणतत्त्व शिव ।
ऌङ्गस्वरूप सर्वबुधप्रिय मङ्गलमूर्ति महेश शिव ।
ॡऊताधीश्वररूपप्रिय शिव वेदान्तप्रियवेद्य शिव । १०
एकानेक स्वरूप विश्वेश्वर योगिहृदिप्रियवास शिव ।
ऐश्वर्याश्रय चिन्मय चिद्घन अच्युतानन्त महेश शिव ।
ओंकारप्रिय उरगविभूषण ह्रींकारादि महेश शिव ।
औरसलालित अन्तकनाशन गौरीसमेत महेश शिव ।
अम्बरवास चिदम्बरनायक तुम्बुरुनारदसेव्य शिव ।
आहारप्रिय आदिगिरीश्वर भोगादिप्रिय पूर्ण शिव ।
कमलास्यार्चित कैलासप्रिय करुणासागर काशि शिव ।
खड्गशैलमृदुढक्काद्यायुध विक्रमरूप विश्वेश शिव ।
गङ्गागिरिसुतवल्लभ गुणहित शङ्कर सर्वजनेश शिव ।
घातुकभञ्जन पातकनाशन गौरीसमेत गिरीश शिव । २०
ङङश्रितश्रुतिमौलिविभूषण वेदस्वरूप विश्वेश शिव ।
चण्डविनाशन सकलजनप्रिय मण्डलाधीश महेश शिव ।
छत्रकिरीटसुकुण्डलशोभित पुत्रप्रिय भुवनेश शिव ।

जन्मजरामृतिनाशन कल्मषरहित तापविनाश शिव ।
झङ्काराश्रय भृङ्गिरिटिप्रिय ओंकारेश महेश शिव ।
ज्ञानाज्ञानविनाशक निर्मल दीनजनप्रिय दीप्त शिव ।
टङ्काद्यायुधधारण सत्वर ह्रींकारैद्य सुरेश शिव ।
ठंकस्वरूप सहकारोत्तम वागीश्वर वरदेश शिव ।
डम्बविनाशन डिंडिमभूषण अम्बरवास चिदीश शिव ।
ढंढंडमरुक धरणीनिश्चल ढुंढिविनायकसेव्य शिव । ३०
णलिनविलोचन नटनमनोहर अलिकुलभूषण अमृत शिव ।
तत्त्वमसीत्यादि वाक्यस्वरूपक नित्यानन्द महेश शिव ।
स्थावर जङ्गम भुवनविलक्षण भावुकमुनिवर सेव्य शिव ।
दुःखविनाशक दलितमनोन्मन चन्दनलेपित चरण शिव ।
धरणीधर शुभ धवलविभास्वर धनदादिप्रिय दान शिव ।
नानामणिगणभूषण निर्गुण नटजनसुप्रियनाट्य शिव ।
पन्नगभूषण पार्वतिनायक परमानन्द परेश शिव ।
फालविलोचन भानुकोटिप्रभ हालाहलधर अमृत शिव ।
बन्धविनाशन बृहदीशामरस्कन्दादिप्रिय कनक शिव ।
भस्मविलोपन भवभयनाशन विस्मयरूप विश्वेस शिव । ४०
मन्मथनाशन मधुपान प्रिय मन्दरपर्वतवास शिव ।
यतिजनहृदयनिवासित ईश्वर विधिविष्ण्यादि सुरेश शिव ।
रामेश्वररमणीयमुखाम्बुज सोमशेखर सुकृति शिव ।
लङ्काधीश्वर सुरगणसेवित लावण्यामृतलसित शिव ।
वरदाभयकर वासुकिभूषण वनमालादिविभूष शिव ।
शान्तिस्वरूप जगत्त्रय चिन्मय कान्तिमतीप्रिय कनक शिव ।
षण्मुखजनक सुरेन्द्रमुनिप्रिय षाड्गुण्यादिसमेत शिव ।
संसारार्णव नाशन शाश्वत साधुहृदिप्रियवास शिव ।
हर पुरुषोत्तम अद्वैतामृतपूर्ण मुरारि सुसेव्य शिव ।
लालितभक्तजनेश निजेश्वर कां नटेश्वर काम शिव । ५०
क्षररूपादिप्रियान्वित सुन्दर साक्षि जगत्त्रय स्वामि शिव ।
साम्बसदाशिव साम्बसदाशिव साम्बसदाशिव साम्बशिव ॥ ५१

इति श्रीशिववर्णमालास्तोत्रम् ।

श्रीपरमेश्वरमातृकावर्णमालास्तोत्रम्

Repeat
hara sAmbasadAshiva sAmbasadAshiva sAmbasadAshiva sAmbashiva .
after each line

---

*shrIshivavarNamAlA stotram*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*